दिनाङ्क :-07.04.2026

प्रात: - 06:55

## PM-CIVIL न्यूक्लियर् विशेषताः

तमिल्नाडु-राज्यस्य कल्पक्कम्-नगरे स्वदेशीयरूपेण परिकल्पितं निर्मितं च प्रोटोटैप्-फ़ास्ट्-ब्रीडर्-रियाक्टर् (पी. एफ्. बी. आर्.) इति रुपेण भारतं स्वस्य परमाणु-ऊर्जा-कार्यक्रमे प्रमुखं सोपानं प्राप्नोत्। प्रधानमन्त्रिणा नरेन्द्रमोदिना अस्याः ऐतिहासिकोपलब्धेः प्रशंसा कृता। सामाजिक-प्रसार-माध्यमे श्रीमोदी अवदत् यत्, भारतम् स्वस्य नागरिक-परमाणु-यात्रायां निर्णायकं स्थानं सम्प्राप्य, त्रि-चरणीय-परमाणु-कार्यक्रमस्य द्वितीये चरणे प्रगतिं करोति। क्षणोऽयं भारताय गौरवपूर्णः अस्तीति ब्रूवन्, श्रीमोदी परियोजनायां संलग्नान् वैज्ञानिकान् अभियन्तॄंश्च अभिनन्दयत्।

## निर्वाचनाभियानम्

_असम-केरल-केन्द्रशासित-पुदुचेरीति प्रदेशानां विधानसभा-निर्वाचनस्य प्रचारः अद्य सायङ्काले समाप्यते। अद्य अन्तिमघण्टासु विभिन्नानां राजनैतिकदलानां प्रमुखनेतारः मतदातृभिस्सह सम्पर्कं स्थापयितुं, एतेषु प्रदेशेषु स्वसमर्थनस्य आधारं सुदृढं कर्तुञ्च समन्वितप्रयासान् कुर्वन्तः सन्ति। असम-राज्ये षड्विंशत्यधिकैकशतं, केरल-राज्ये चत्वारिंशदधिकैकशतं, पुदुचेरी-राज्ये त्रिंशत् स्थानेभ्यश्च गुरुवासरे एकचरणीय-मतदानं भविष्यति। ह्यः भाजपा-पक्षस्य वरिष्ठः_नेता प्रधानमन्त्री च श्रीनरेन्द्रमोदी असम-राज्यस्य बारपेटा, होजल्, डिब्रूगढ-क्षेत्रेषु सार्वजनिकसभां कृतवान्। राज्ये काङ्ग्रेस्-दलम् अपि स्वप्रचारं तीव्रम् अकरोत्। दलस्य वरिष्ठनेत्री कुमारी शैलजा ह्यः गुवाहटी-नगरे वार्ताहरसमूहम् अभिसंबोधितवती। अत्रान्तरे, असम-गण-परिषद्, असम-जातीय-परिषद्, राज्योर-दल इत्यादीनि अन्यानि राजनैतिकदलानि अपि सम्पूर्णे असम-राज्ये

स्वकीयानम् प्रचारप्रयासान् प्रावर्धयन्। पुदुचेरीति केन्द्रशासितप्रदेशे ह्यः व्यस्तः प्रचारकार्यक्रमः दृष्टः, यत्र प्रमुखाः नेतारः सम्पूर्णे क्षेत्रे जनसभाः सम्बोधितवन्तः। केरल-राज्ये प्रचारस्य मार्गः समानरूपेण सजीवः आसीत्, यत्र विभिन्नानां राजनैतिकदलानां वरिष्ठनेतृभिः सम्पूर्णे राज्ये सभाः, रोड्-शो इति च आयोजिताः आसन्। एतदतिरिच्य, तमिल्नाडु-राज्ये एक-चरणीय मतदानाय, पश्चिमवङ्गप्रदेशे च प्रथम-चरणीय-मतदानाय अद्य नामाङ्कनपत्राणां परीक्षणं भविष्यति।

## GOVT-WEST एशिया ब्रिफ्ः

पश्चिम-एशिया-द्वन्द्वस्य मध्ये देशे अन्नधान्यानां पर्याप्तं भण्डारणम् अस्तीति सर्वकारः आश्वासितवान्। ह्यः नवदेहल्यां पश्चिम-एशियायाः वार्तमानिकस्थिति विषये अन्तर्मन्त्रालयीयं विवरणं प्रयच्छन् उपभोक्तृकार्यविभागस्य अपरसचिवः अनुपम् मिश्रः अवदत् यत् आवश्यकवस्तूनां मूल्येषु सामान्यरूपेण अस्थिरता नास्तीति। पेट्रोलियम-प्राकृतिकग्यास्-मन्त्रालयस्य संयुक्तसचिवेन सुजाता शर्मा इत्यनया उक्तं यत् मार्च्-मासस्य प्रथमदिनाङ्कातदारभ्य प्रायः अष्टादशकोटिः सिलिण्डरेति_वात्यन्धनकोशाः गृहेषु प्रदत्ताः इति।

## रा.स.अध्यक्षः प्रस्तावं निराकरोत्।

राज्यसभायाः सभापतिः सी. पी. राधाकृष्णन्वर्यः लोकसभाध्यक्षः ओम् बिर्ला च मुख्य-निर्वाचन-आयुक्तं ज्ञानेशकुमारं निष्कासयितुं विपक्षीयसदस्यैः आनीतं प्रस्तावं निराकृतवन्तौ। राज्यसभासचिवालयेन लोकसभासचिवालयेन च पृथक् पृथक् सम्प्रेषणे सूचितं यत् प्रस्तावस्य सूचना सम्यक् पर्यालोचयित्वा, तत्सम्बद्धानां सर्वेषां पक्षाणां विषयाणाञ्च सावधानेन वस्तुनिष्ठतया च मूल्याङ्कनेन सदनयोः सभापतिवर्यौ प्रस्तावमिमं निराकृतवन्ताविति।

सर्वोच्चन्यायालयः/ पश्चिमबङ्गः/ राष्ट्रिय-अन्वेषण-संस्था

कल्लाचक्-नगरस्य मोथाबाड़ी-नगरे मतदातृसूच्यां संशोधनार्थं कार्यं कुर्वन्तः सप्त न्यायपदाधिकारिणः परिवेष्टिताः उत्पीडिताः च अभवन्, ततः परं सर्वोच्चन्यायालयेन पश्चिमवङ्गस्य प्रशासनं बहुशः निन्दितम्। मुख्यन्यायाधीशः सूर्यकान्तः अवदत् यत्, यदि राज्यं एतादृशानां स्थितीनां नियन्त्रणे असफलम् अभवत् तर्हि न्यायालयः एव अग्रिमस्य उपायस्य निर्णयं करिष्यतीति। सर्वोच्चन्यायालयेन राज्य-आरक्षिबलम् घटनया सह सम्बद्धाः सर्वे प्रकरण-अभिलेखाः राष्ट्रिय-अन्वेषण-संस्थायै समर्पयितुं आदेशो दत्तः अस्ति। न्यायालयेन इत्यपिपि निर्देशः दत्तः यत् बन्धितौ द्वौ सूत्रधारभूतौ अभियुक्तौ तत्क्षणमेव एन्. ऐ. ए इत्यस्य अभिरक्षायै समर्पयन्त्विति।

ट्रम्प थ्रेटन् इरानः

अमेरिका-देशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्पेन उक्तं यत् यदि ईरानदेशः तेह्रान्-देशेन सह श्वः प्रातः भारतीयसमयानुसारं सार्धपञ्चवादनं यावत् सामान्य-सम्मतं व्यवहारं न करिष्यति तर्हि इरानस्य विनाशलीला समारप्स्यते इति भीत्याभिवर्धिका सूचना दत्तास्ति। व्हाइट-हाउस इत्यत्र पत्रकारसम्मेलने तेनोक्तं यत् निर्धारितसमयसीमायाः अनन्तरं अमरिकादेशस्य सैन्यशक्तिः जागृता भूत्वा इरान्-देशस्य प्रत्येकः सेतुः नष्टः करिष्यतीति ।

आई. पी. एल्.

आई. पी. एल्. इति क्रिकेट्-क्रीडायां कोल्काता-नाइट्-रायडर्स् अथ पञ्जाब्-किङ्ग्स् इत्येतयोः मध्ये गत रात्रौ कोल्कातायाः ईडन्-गार्डन्स् इति क्रीडाङ्गणे वृष्ट्या क्रीडा स्थगिता।